# Shri Hatakeshvara Ashtakam

# श्रीहाटकेश्वराष्टकम्

## Document Information

Text title : Shri Hatakeshvara Ashtakam

File name : hATakeshvarAShTakam.itx

Category : shiva, aShTaka

Location : doc_shiva

Latest update : December 26, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 26, 2019

*sanskritdocuments.org*

Shri Hatakeshvara Ashtakam

# श्रीहाटकेश्वराष्टकम्

जटातटान्तरोलसत्सुरापगोर्मिभास्वरं
    ललाटनेत्रमिन्दुनाविराजमानशेखरम् ।
लसद्विभूतिभूषितं फणीन्द्रहारमीश्वरं
    नमामि नाटकेश्वरं भजामि हाटकेश्वरम् ॥ १॥

पुरान्धकादिदाहकं मनोभवप्रदाहकं
    महाधराशिनाशकमभीप्सितार्थदायकम् ।
जगत्त्रयैककारकं विभाकरं विदारकं
    नमामि नाटकेश्वरं भजामि हाटकेश्वरम् ॥ २॥

मदीय मानसस्थले सदास्तु ते पदद्वयं
    मदीय वक्त्रपङ्कजे शिवेति चाक्षरद्वयम् ।
मदीय लोचनाग्रतः सदार्धचन्द्रविग्रहं
    नमामि नाटकेश्वरं भजामि हाटकेश्वरम् ॥ ३॥

भजन्ति हाटकेश्वरं सुभक्तिभावतोत्रये
    भवन्ति हाटकेश्वरः प्रमाणमात्र नागरः ।
धनेन तेज साधिका कुलेन चाखिलोन्नता
    नमामि नाटकेश्वरं भजामि हाटकेश्वरम् ॥ ४॥

सदाशिवोऽहमित्यहर्निशं भजेत यो जनः
    सदा शिवं करोति तं न संशयोत्र कश्चन ।
अहो दयालुता महेश्वरस्य दृश्यतां बुधा
    नमामि नाटकेश्वरं भजामि हाटकेश्वरम् ॥ ५॥

धराधरात्मजापते त्रिलोचनेश शङ्कर
    गिरीश चन्द्रशेखराहिराज भूषणेश्वरः ।
महेश नन्दिवाहनेति सङ्कटन्नहर्निशं
    नमामि नाटकेश्वरं भजामि हाटकेश्वरम् ॥ ६॥

महेश पाहि मां मुदा गिरीश पाहि मां सदा
भवार्णवे निमज्जितो त्वमेवमेऽसि तारकः ।
करावलम्बनं झटित्य होधुनां प्रदीयतां
नमामि नाटकेश्वरं भजामि हाटकेश्वरम् ॥ ७॥

धराधरेश्वरेश्वरं शिवं निधीश्वरेश्वरं
सुरासुरेश्वरं रमापतिश्वरं महेश्वरम् ।
प्रचण्ड चण्डीकेश्वरं विनीत नन्दिकेश्वरं
नमामि नाटकेश्वरं भजामि हाटकेश्वरम् ॥ ८॥

हाटकेशस्य भक्त्या यो हाटकेशाष्टकं पठेत् ।
हाटकेश प्रसादेन हाटकेशत्वमाप्नुयात् ॥

इति श्रीहाटकेश्वराष्टकं सम्पूर्णम् ।

*Shri Hatakeshvara Ashtakam*

pdf was typeset on December 26, 2019

Please send corrections to *sanskrit@cheerful.com*